National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2017; 1(11): 98-100
© 2017 NJHSR
www.sanskritarticle.com

**Prof. Pralhad R Joshi**
Department of Education,
Rashtriya Sanskrit Vidyapeeth,
Tirupati

**Correspondence:**
**Prof. Pralhad R Joshi**
Department of Education,
Rashtriya Sanskrit Vidyapeeth,
Tirupati

# अध्यापकशिक्षायाः स्वरूपम्, आवश्यकता च : एकं समीक्षात्मकम् अध्ययनम्

**Prof. Pralhad R Joshi**

## Abstract (सारांशः)

अस्मिन् लेखे अध्यापकशिक्षायाः स्वरूपम्, तस्याः आवश्यकता, प्रशिक्षणस्य च तत्त्वमीमांसा विस्तरेण निरूपिता अस्ति। शिक्षा मानवजीवनस्य मूलाधारः अस्ति, तस्याः गुणवत्तानिर्भरं राष्ट्रस्य भविष्यं भवति। गुणवत्तायुक्तशिक्षायाः मूलं गुणवत्तायुक्तः अध्यापकः। अतः अध्यापकशिक्षा न केवलं व्यावसायिकप्रशिक्षणम्, अपि तु मानवनिर्माणस्य सशक्तप्रक्रिया इति प्रतिपाद्यते। अस्मिन् लेखे शिक्षायाः, प्रशिक्षणस्य, अध्यापकशिक्षायाः च भेदाः स्पष्टीकृताः। तदनन्तरं अध्यापकशिक्षायाः आधारभूतधारणाः, नूतनपरिप्रेक्ष्ये तस्याः विकासः, स्वातन्त्र्योत्तरभारते तस्याः परिवर्तनम्, समाजोपयोगिता च विवृता अस्ति। अन्ते प्रशिक्षणस्य अनिवार्यता, तस्य व्यावहारिकफलितानि, शिक्षायाः व्यापकदृष्टिः च विवेचिता। एषः लेखः अध्यापकशिक्षां केवलं पाठ्यक्रमनिबद्धां न मन्यते, किन्तु सततविकासप्रक्रियारूपेण स्थापयति।

## Introduction (प्रस्तावना)

"शिक्षा" इति शब्दः केवलं ज्ञानप्रदानक्रिया न, अपि तु जीवनस्य परिष्कारप्रक्रिया अस्ति। यया मनुष्यः अज्ञानान्धकारात् ज्ञानप्रकाशं प्रति नीयते, सा शिक्षा। किन्तु यदि शिक्षा जीवनस्य दीपः अस्ति, तर्हि अध्यापकः तस्य दीपस्य प्रज्वालकः। यथार्थतः अध्यापकस्य गुणवत्ता एव शिक्षाव्यवस्थायाः मेरुदण्डः भवति। अतः अध्यापकस्य सम्यक् शिक्षणं, तस्य व्यक्तित्वविकासः, कौशलवर्धनम्, सामाजिकदृष्टिविस्तारः च अत्यावश्यकम्। प्राचीनभारते गुरुशिष्यपरम्परा अध्यापनस्य आधारः आसीत्। तत्र अध्यापकः केवलं विषयप्रदाता न, किन्तु जीवनमार्गदर्शकः आसीत्। आधुनिककाले तु शिक्षाक्षेत्रे तीव्रपरिवर्तनानि जातानि। विज्ञानप्रौद्योगिकी, लोकतन्त्रव्यवस्था, वैश्वीकरणप्रक्रिया च शिक्षायाः स्वरूपं परिवर्तितवन्तः। एतेषां परिवर्तनानां सन्दर्भे अध्यापकस्य भूमिका अपि विस्तृता जाता।

अतः अध्यापकशिक्षा न केवलं विषयज्ञानप्रदायिनी, किन्तु शिक्षणकौशलविकासिनी, सामाजिकदायित्वबोधप्रवर्तिनी, नैतिकमूल्यसंवर्धिनी च प्रक्रिया इति अत्र प्रतिपाद्यते। अस्मिन् लेखे अध्यापकशिक्षायाः संकल्पना, आवश्यकता, तत्त्वानि, नूतनदृष्टयः च सम्यग् विशदीक्रियन्ते।

### अध्यापकशिक्षायाः संकल्पना

अध्यापकशिक्षा इति पदं द्वाभ्यां पदाभ्यां निर्मितम् – "अध्यापक" तथा "शिक्षा"। अध्यापकः सः, यः अध्यापनकार्ये नियोजितः भवति; शिक्षा तु तस्य सम्यग्विकासप्रक्रिया। सामान्यशिक्षा मनुष्यस्य सर्वाङ्गीणविकासं साधयति, किन्तु अध्यापकशिक्षा विशेषतया अध्यापनकौशलविकासाय, शैक्षिकदृष्टिकोणपरिष्काराय, शिक्षणपद्धतिविकासाय च प्रवर्तते।

केवलं विषयज्ञानं पर्याप्तं न भवति। यद्यपि कश्चित् व्यक्ति गणिते, भाषायां वा निपुणः स्यात्, तथापि सः आवश्यकं न यत् उत्तमाध्यापकः भवेत्। अध्यापनं कला अपि अस्ति, विज्ञानं अपि अस्ति। छात्राणां

मनोविज्ञानज्ञानम्, शिक्षणोपायानां प्रयोगः, कक्षाव्यवस्थापन-कौशलम्, मूल्याङ्कनप्रक्रियायाः ज्ञानम् – एते सर्वे अध्यापकशिक्षायाः अविभाज्याङ्गानि सन्ति। अतः अध्यापकशिक्षा सैव प्रक्रिया या भाव्याध्यापकान् ज्ञानसम्पन्नान्, कौशलसम्पन्नान्, नैतिकदृष्ट्या सज्जान्, सामाजिकदायित्वपरायणान् च करोति। एषा प्रक्रिया सैद्धान्तिकं व्यावहारिकं च उभयं पक्षं समन्वयति।

**अध्यापकशिक्षायाः आवश्यकता**

यदि राष्ट्रस्य भविष्यं छात्रेषु निहितम् अस्ति, तर्हि छात्राणां भविष्यं अध्यापकेषु निहितम् अस्ति। अतः अध्यापकशिक्षायाः आवश्यकता स्वतः सिद्धा भवति। अशिक्षितः, अप्रशिक्षितः वा अध्यापकः छात्राणां विकासे बाधकः भवेत्। प्रथमं, अध्यापकशिक्षा गुणवत्तायुक्ता-ध्यापनस्य आधारः अस्ति। प्रशिक्षितः अध्यापकः विषयं स्पष्टतया प्रस्तोतुं, विविधपद्धतीनां प्रयोगं कर्तुं, छात्रानां प्रश्नान् समाधानं कर्तुं च समर्थः भवति। द्वितीयं, सा छात्रकेन्द्रितदृष्टिकोणं विकसितुं साहाय्यं करोति। आधुनिकशिक्षायां अध्यापनं केवलं वक्तृकला न, किन्तु सहभागितामूलकप्रक्रिया अस्ति। तृतीयं, सामाजिकपरिवर्तनस्य साधनरूपेण अध्यापकस्य भूमिका महती अस्ति। यदि सः सामाजिकमूल्यानि, लोकतान्त्रिकभावनाः, नैतिकतत्त्वानि च स्वयम् अवगच्छति, तर्हि तानि छात्रेषु संचारयितुं शक्नोति। चतुर्थं, सततपरिवर्तनशीलस्य जगतः अनुकूलनाय अध्यापकस्य निरन्तरप्रशिक्षणम् आवश्यकम्। अतः अध्यापकशिक्षा केवलं प्रमाणपत्रप्राप्त्यर्थं न, किन्तु गुणवत्तायुक्तशिक्षासंस्थापनार्थं अनिवार्या अस्ति।

**प्रशिक्षणस्य स्वरूपम्**

"प्रकृष्टं शिक्षणं प्रशिक्षणम्" इति उक्तिः सारगर्भिता। प्रशिक्षणं तु विशिष्टकार्यनिष्पादनाय कौशलविकासप्रक्रिया अस्ति। यत्र क्रमबद्धतया ज्ञानम्, कौशलम्, अभिवृत्तिः, व्यवहारः च विकसिताः भवन्ति, तत् प्रशिक्षणम् इति कथ्यते। प्रशिक्षणस्य विशेषता अस्ति यत् तत्र उद्देश्यानि स्पष्टानि, मापनयोग्यानि च भवन्ति। उदाहरणार्थं, यदि अध्यापकः पाठयोजनां निर्मातुं, शैक्षिकसाधनानि निर्मातुं, कक्षायां शिस्तं स्थापयितुं वा प्रशिक्ष्यते, तर्हि एतानि कौशलानि अभ्यासेन विकसितानि भवन्ति। प्रशिक्षणं सैद्धान्तिकज्ञानं व्यावहारिकानुभवेन संयोजयति। केवलं ग्रन्थपठनं न, अपि तु अभ्यासपाठः, प्रात्यक्षिकम्, प्रतिपुष्टिः (feedback), आत्ममूल्या-ङ्कनं च प्रशिक्षणस्य प्रमुखतत्त्वानि सन्ति। प्रशिक्षणं व्यक्तेः कार्यदक्षतां वर्धयति, आत्मविश्वासं जनयति, त्रुटीनां न्यूनतां करोति च।

**शिक्षा तथा प्रशिक्षणयोः भेदः**

शिक्षा व्यापकप्रक्रिया अस्ति, प्रशिक्षणं तु तस्याः विशिष्टाङ्गम्। शिक्षा व्यक्तित्वविकासाय, नैतिकमूल्यसंवर्धनाय, चिन्तनशक्ति-विकासाय च प्रवर्तते। प्रशिक्षणं तु विशिष्टकार्यदक्षताविकासाय सीमितम्। शिक्षायां व्यक्तिवैचित्र्यं स्वीकृत्य तस्य विकासः क्रियते; प्रशिक्षणं तु प्रायः समानमानदण्डान् स्थापयति। शिक्षा दीर्घकालिकप्रक्रिया, प्रशिक्षणं अल्पकालिकं स्यात्। शिक्षा सर्जनात्मकतां प्रेरयति; प्रशिक्षणं कार्यनिष्पादनदक्षतां वर्धयति । अध्यापकशिक्षा उभयोरपि समन्वयः अस्ति – व्यापकशिक्षा तथा विशिष्टप्रशिक्षणम्।

**अध्यापकशिक्षायाः आधारभूतधारणाः**

अध्यापकशिक्षा मानवनिर्माणप्रक्रियायाः अंगम् अस्ति। तस्याः आधारभूतधारणाः बह्वः सन्ति। प्रथमं, अध्यापकः केन्द्रबिन्दुः भवेत्। द्वितीयं, पाठ्यक्रमः स्तरानुसारं विकसितः स्यात् – प्राथमिक, माध्यमिक, विश्वविद्यालयीय इत्यादि। तृतीयं, विषयवस्तु तथा विधिवस्तु उभयं समुचितरूपेण संयोजनीयम्। चतुर्थं, सामुदायिक-सहकार्यं आवश्यकम्। पञ्चमं, अध्यापकः सामाजिकपरिवर्तनस्य वाहकः भवेत्। एताः धारणा अध्यापकशिक्षायाः दार्शनिकाधारं निर्मान्ति।

**स्वातन्त्र्योत्तरकाले अध्यापकशिक्षायाः नूतनदृष्टयः**

स्वातन्त्र्यानन्तरं भारतदेशे शिक्षाक्षेत्रे महत्त्वपूर्णपरिवर्तनानि जातानि। पूर्वकालीनवैदेशिकमूलकप्रशिक्षणपद्धतयः लोकतान्त्रिक-मूल्यानुकूलाः नासन्। अतः भारतीयसंस्कृत्यानुकूलं, राष्ट्रीयआकाङ्क्षा-नुकूलं च अध्यापकशिक्षायाः पुनर्निर्माणम् अभवत्। राधाकृष्णन् महोदयेन अपि प्रतिपादितं यत् शिक्षा केवलं स्मरणक्रिया न, किन्तु जीवनोपयोगी क्रियाशीलता अस्ति। अतः अध्यापकशिक्षायां नैतिक-मूल्यानि, सामाजिकदायित्वम्, अनुसन्धानशीलता, सर्जनात्मकता च समाविष्टानि। आधुनिकदृष्ट्या सततव्यावसायिकविकासः (Continuous Professional Development) अपि अध्यापकशिक्षायाः अङ्गीकृतः।

**प्रशिक्षणस्य अनिवार्यता**

कस्यापि कार्यस्य दक्षतया सम्पादनाय प्रशिक्षणम् अत्यावश्यकम्। अप्रशिक्षितः अध्यापकः स्वकार्ये अनिश्चितः भवति, त्रुटीनां सम्भावना वर्धते, छात्रेषु भ्रमः जायते। प्रशिक्षणेन समयस्य शक्तेश्च संरक्षणं भवति। वैज्ञानिकपद्धत्या कौशलविकासः भवति। KASB (Knowledge, Application, Skill, Behaviour) इति चतुर्विध विकासः प्रशिक्षणस्य मूलम् अस्ति। अध्यापकप्रशिक्षणं गुणवत्तायुक्त-शिक्षायाः मूलाधारः इति निःसंशयं वक्तुं शक्यते।

**उपसंहारः**

समग्रतया दृष्ट्वा अध्यापकशिक्षा राष्ट्रनिर्माणस्य प्रमुखस्तम्भः अस्ति। सा केवलं व्यावसायिकप्रशिक्षणप्रक्रिया न, अपि तु मानव-निर्माणस्य, सामाजिकपरिवर्तनस्य, नैतिकमूल्यसंवर्धनस्य च सशक्त-माध्यमम्। शिक्षा यदा जीवनपरिष्कारप्रक्रिया अस्ति, तदा अध्यापकशिक्षा तस्याः प्राणः इव। आधुनिकपरिवर्तनशीलजगति

अध्यापकस्य भूमिका अत्यन्तं विस्तृता जाता। तस्मात् तस्य निरन्तरप्रशिक्षणं, आत्मपरिष्कारः, अनुसन्धानशीलता च आवश्यकाः। गुणवत्तायुक्ताध्यापकः एव गुणवत्तायुक्तशिक्षायाः निर्माता भवति। अतः अध्यापकशिक्षायाः सुदृढीकरणं सर्वथा अनिवार्यम्।

**सन्दर्भग्रन्थसूची**


1. Aggarwal, J. C. (2009). Teacher and Education in a Developing Society. New Delhi: Vikas Publishing House.
2. Bhatia, K. K., & Bhatia, B. D. (2011). The Principles and Methods of Teaching. New Delhi: Doaba House.
3. Dash, B. N. (2005). Teacher and Education in the Emerging Indian Society. New Delhi: Neelkamal Publications.
4. शर्मा, रामनाथ. (2010). शिक्षा के दार्शनिक एवं समाजशास्त्रीय आधार. मेरठ: विनोद पुस्तक मन्दिर।
5. पाण्डेय, रामशकल. (2012). अध्यापक शिक्षा. आगरा: विनोद पुस्तक मन्दिर।
6. सिंह, आर. पी. (2008). शिक्षा मनोविज्ञान. नई दिल्ली: अग्रवाल पब्लिकेशन्स।
7. तिवारी, एस. एन. (2015). भारतीय शिक्षा का विकास एवं समस्याएँ. नई दिल्ली: राधा पब्लिकेशन्स।